Thus स्वस्ति देवदत्ताय सहपुत्राय, सहच्छात्राय, सहामात्याय ॥ But optionally here, as स्वस्ति भवते सहगवे or सगवे, सहवत्साय or सवत्साय, सहहलाय, or सहलाय ॥ The phrase अगोवत्सहलेषु is no part of the original sûtra, but has been added by the Kâśikâ from a Vârtika.

समानस्य छन्दस्यमूर्द्धप्रभृत्युदर्केषु ॥ ८४ ॥ पदानि ॥ समानस्य, छन्दसि, अ, मूर्द्ध, प्रभृति, उदर्केषु, ॥

वृत्तिः ॥ समानस्य स इत्ययमादेशो भवति छन्दसि विषये मूर्द्धन् प्रभृति उदर्क इत्येतान्युत्तरपदानि वर्जयित्वा ॥

84. **स** is the substitute of **समान** in the Chhandas, but not before **मूर्धन्, प्रभृति** and **उदर्क** ॥

Thus अनुभ्राता सगर्भ्यः, अनुसखा सयूथ्यः, योनः सनुत्यः (See IV. 4. 114). समानो गर्भः = सगर्भः, तत्र भवः = सगर्भ्यः formed by यत् affix IV. 4. 114. But समानमूर्द्धा, समानप्रभृतयः, समानोदर्काः ॥ This substitution takes place in secular literature also, as सपक्षः, साधर्म्यम्, सजातीयः &c.

ज्योतिर्जनपदरात्रिनाभिनामगोत्ररूपस्थानवर्णवयोवचनबन्धुषु ॥ ८५ ॥ पदानि ॥ ज्योतिः, जनपद, रात्रि, नाभि, नाम, गोत्ररूप, स्थान, वर्ण, वयोवचन, बन्धुषु, (समानस्यसः)

वृत्तिः ॥ ज्योतिस् जनपद रात्रि नाभि नामन् गोत्र रूप स्थान वर्ण वयस् वचन बन्धु इत्येतेषूत्तरपदेषु समानस्य स इत्ययमादेशो भवति ॥

85. This substitution of स for समान् takes place before ज्योतिस्, जनपद, रात्रि, नाभि, नामन्, गोत्र, रूप, स्थान वर्ण, वयस्, वचन and बन्धु in the common language also.

Thus सज्योतिः, सजनपदः, सरात्रिः, सनाभिः, सनामा, सगोत्रः, सरूपः, सस्थानः, सवर्णः, सवयाः, सवचनः, सबन्धुः ॥

चरणे ब्रह्मचारिणि ॥ ८६ ॥ पदानि ॥ चरणे, ब्रह्मचारिणि, (समानस्यसः) (उत्तरपदे)

वृत्तिः ॥ चरणे गम्यमाने ब्रह्मचारिण्युत्तरपदे समानस्य स इत्ययमादेशो भवति ॥

86. स is substituted for समान before ब्रह्मचारिन् when it denotes persons engaged in fulfilling a common vow of studying the Vedas.

Thus समानो ब्रह्मचारी = सब्रह्मचारी ॥ ब्रह्म means the Vedas. The vow of studying the Veda, is also called ब्रह्म ॥ He who is engaged in the performance of that vow is called ब्रह्मचारिन् ॥ समान refers to the vow, the vow of studying being common to both : i. e. समाने ब्रह्मणि व्रतचारी = सब्रह्मचारी ॥ According to Bhattoji Dikshit चरणे in the sûtra means a शाखा or a department of Vedic study. He who has a common (samâna) branch (charaṇa) is a sabrahmchâri.

तीर्थे ये ॥ ८७ ॥ पदानि ॥ तीर्थे, ये, (समानस्यसः) ॥

वृत्तिः ॥ तीर्थशब्दउत्तरपदे यत्प्रत्ययपरे परतः समानस्य स इत्ययमादेशो भवति ॥

87. स is substituted for समान, before तीर्थ when the affix यत् is added to it.

Thus सतीर्थ्यः = समाने तीर्थे वासी (IV. 4. 107). 'a fellow-student?

विभाषोदरे ॥ ८८ ॥ पदानि ॥ विभाषा, उदरे, (समानस्यसः) (उत्तरपदे) ॥

वृत्तिः ॥ उदरशब्दउत्तरपदे यत्प्रत्ययान्ते समानस्य विभाषा स इत्ययमादेशो भवति ॥

88. The substitution of स for समान is optional before उदर when the affix यत् is added to it.

Thus सोदर्यः or समानोदर्यः (IV. 4. 108).

दृग्दृशवतुषु ॥ ८९ ॥ पदानि ॥ दृक्, दृश, वतुषु, (समानस्यसः) ॥

वृत्तिः ॥ दृक् दृश वतु इत्येतेषु परतः समानस्य स इत्ययमादेशो भवति ॥

वार्त्तिकम् ॥ दृक्षे चेतिं वक्तव्यम् ॥ वा० ॥ दृशेः क्सप्रत्ययोपि तत्रैव वक्तव्यः ॥

89. स is substituted for समान, before दृक्, दृश and the affix वत् ॥

Thus सदृक्, सदृशः ॥ The affixes कञ् and क्विन् are added to दृश् under III. 2. 60. *Vârt* :—which give as the forms दृक् and दृश ॥ *Vârt* :—So also before दृक्ष : as सदृक्षः ॥ दृक्ष is formed by क्स affix under III. 2. 60. Vârtika. The affix वतु is taken for the sake of the subsequent sûtra.

इदंकिमोरीश्की ॥ ९० ॥ पदानि ॥ इदम्, किमोः, ईश, की, (दृग्दृशवतुषु) ॥

वृत्तिः ॥ इदं किम् इत्येतयोरीश् की इत्येतौ यथासंख्यमादेशौ भवतो दृग्दृशवतुषु ॥

वार्त्तिकम् ॥ दृक्षे चेति वक्तव्यम् ॥

90. ई is substituted for इदम् and की for किम् before the words दृक्, दृश and the affix वत् ॥

Thus ईदृक्, ईदृशः and इयान्, कीदृक्, कीदृशः and कियान् ॥ ईवत् and कीवत् are changed to ई+इयत् and का+इयत् by V. 2. 40 and the long ई is elided by VI. 4. 148 : and we get इयत् and कियत् ॥

Vârt :—So also before दृक्ष, as ईदृक्षः and कीदृक्षः ॥

आ सर्वनाम्नः ॥ ९१ ॥ पदानि ॥ आ, सर्वनाम्नः, (दृग्दृशवतुषु) ॥

वृत्तिः ॥ सर्वनाम्न आकारादेशो भवति दृग्दृशवतुषु ॥

वार्त्तिकम् ॥ दृक्षे चेति वक्तव्यम् ॥

91. आ is substituted for the final of the Pronouns (I. 1. 27) before these words दृक्, दृश and the affix वत् ॥

Thus तादृक्, तादृशः. तावान्, यादृक्, यादृशः, यावान् ॥

Vârt :—So also before दृक्ष, as तादृक्षः and यादृक्षः ॥

विष्वग्देवयोश्च टेरद्र्यञ्चतौ (ता) वप्रत्यये ॥ ९२ ॥ पदानि ॥ विष्वक्, देवयोः, च, टेः, अद्रि, अञ्चतौ, अप्रत्यये ॥

वृत्तिः ॥ विष्वक् देव इत्येतयोः सर्वनाम्नश्च टेरद्रीत्ययमादेशो भवति अञ्चतौता वप्रत्ययान्तउत्तरपदे ॥

वार्त्तिकम् ॥ छन्दसि स्त्रियां बहुलमिति वक्तव्यम् ॥

92. In the room of the last vowel with the consonant that follows it, of a Pronoun and of the words विष्वक् and देव, is substituted अद्रि, when अञ्च with the affix व follows.

Thus विष्वगञ्चति=विष्वद्र्यङ्, This form is thus evolved. अञ्च+क्विन्= अञ्च्+O=अञ्च्+नुम् (VII. 1. 70) Then there is elision of the final conjunct consonaut ञ्च्, then the final dental is changed to guttural because of the क्विन् affix (VIII. 2. 62), e. i. न् is changed to ङ् and we have अङ् which with विष्वद्रि gives the above form. देवद्र्यङ्, तद्र्यङ्, यद्र्यङ् ॥ अद्रि and सध्रि (VI. 3. 95) have acute on the final irregularly (nipâtan) in order to prevent the krit-accent. and when इ is changed into य् the following vowel becomes svarita (VIII. 2. 4). Why do we say of विष्वग् and देव ? Observe अश्वाची=अश्वमञ्चति, the feminine ङीप् being added by IV. 1. 6 *Vârt*. The अ of अच् is elided by VI. 4. 138. and the final of अश्व is lengthened by VI. 3. 138. Why 'when अञ्च follows'? Observe विष्वग्युक् ॥ Why do we say 'when the affix व् follows'? Observe विष्वगञ्चनं ॥ The व is totally elided by VI. 1. 67. Another reading of the sûtra is अप्रत्यये (अञ्चतावप्रत्यये). It would give the same result, the meaning then being when no affix follows. The word वप्रत्यये or अप्रत्यये indicates by implication that in other places where simply a verb is mentioned, it means a word-form beginning with that verb which ends with some affix. For had अप्रत्यये not been used, then the rule would have applied not only when añch followed, but when añchana ending in ल्युट् also followed. The maxim धातुग्रहणे तदादि विधिरिष्यते is illustrated in अयस्कृतं and

अयस्कारः; for VIII. 3. 46 teaches that visarga is changed into स् when कृ follows. There the कृ denotes not only the root कृ but a word derived from कृ, therefore which begins with कृ, such as कारः and कृतः ॥ Therefore the rule applies to forms like अयस्कृत् which is followed merely by the verb कृ; as well as to forms like अयस्कृतः ॥

Vârt :—In the Vedas, diversely before the feminine nouns: thus in "विश्वाची च घृताची च" there is no substitution in विश्वाची, but in कद्रीची there is this substitution. कद्रीची is derived from किम्+अञ्च्=कद्रि+अञ्च् ॥ Then is added ङीप् and then like अश्वाची ॥

समः समि ॥ ९३ ॥ पदानि ॥ समः, समि, ॥

वृत्तिः ॥ समित्येतस्य समि इत्ययमादेशो भवति अञ्चतौ व (अ) प्रत्ययान्त उत्तरपदे ॥

93. **समि** is substituted for **सम्**, before this **अञ्च** when no affix (or **व** affix) follows.

Thus सम्यक्, सम्यञ्चौ, सम्यञ्चः ॥

तिरसस्तिर्यलोपे ॥ ९४ ॥ पदानि ॥ तिरसः, तिरि, अलोपे, ॥

वृत्तिः ॥ तिरस् इत्येतस्य तिरि इत्ययमादेशो भवत्यञ्चतौ व (अ) प्रत्ययान्तउत्तरपदे ऽलोपे । यदा ऽस्य लोपो न भवति ॥

94. **तिरि** is substituted for **तिरस्** before this **अञ्च्** when no affix (or **व** affix) follows, provided that the **अ** of **अञ्च्** is not elided.

Thus तिर्यङ्, तिर्यञ्चौ, तिर्यञ्चः ॥ Why do we say 'when there is no elision'? Observe तिरश्चा, तिरश्चे ॥ Here अ is elided by VI. 4. 138. The word अलोपे in the sûtra is ambiguous. It may mean elither (1) " where अ is elided" or (2) "Where there is no elision". The latter meaning should be taken however.

सहस्य सध्रिः ९५ ॥ पदानि ॥ सहस्य, सध्रिः, ॥

वृत्तिः ॥ सहेत्यस्य सध्रिरित्ययमादेशो भवत्यञ्चतौ व (अ) प्रत्ययान्तउत्तरपदे ।

95. **सध्रि** is the substitute of **सह**, before **अञ्च्** followed by no affix (or **व** affix).

Thus सध्र्यङ्, सध्र्यञ्चौ, सध्र्यञ्चः; and सध्रीचः, सध्रीचा ॥ See VI. 3. 138 for long vowel.

सध मादस्थयोश्छन्दसि ॥ ९६ ॥ पदानि ॥ सध, माद, स्थयोः, छन्दसि, ॥

वृत्तिः ॥ छन्दसि विषये माद स्थ इत्येतयोरुत्तरपदयोः सहस्य सध इत्ययमादेशो भवति ॥

96. **सध** is substituted for **सह** in the Veda, when **माद्** and **स्थ** follow.

Thus सधमादोद्युम्न्य एकास्ताः, सधस्थाः ॥ Another example is आत्वा वृहन्तो हरयो युजाना, अर्वागिन्द्र सधमादो वहन्तु (Rig III. 3. 7) सहमाद्यन्ति देवा अस्मिन् ॥

द्व्यन्तरुपसर्गेभ्यो ऽप ईत् ॥ ९७ ॥ पदानि ॥ द्वि, अन्तर्, उपसर्गेभ्यः, अपः, ईत्, ॥

वृत्तिः ॥ द्वि अन्तरित्येताभ्यामुपसर्गाच्चोत्तरस्याबित्येतस्य ईकारादेशो भवति ॥

वार्त्तिकम् ॥ समापईत्वे प्रतिषेधो वक्तव्यः ॥ वा० ॥ ईत्वमनवर्णादिति वक्तव्यम् ॥

97. After द्वि, अन्तर् and Prepositions, long ई is the substitute of अप् ॥

By I. 1. 54, ई replaces the *first-letter* of अप् viz अ only. Thus द्वीपः, अन्तरीपः, नीपम्, वीपम्, समीपम् ॥ The samâsanta अ is added by V. 4. 74.

Vârt:—Prohibition should be stated with regard to समाप ॥ समापं नाम देवयजनम् ॥ Others say after a Preposition in अ, the long ई substitution does not take place. Thus प्रापम्, परापम् ॥ The word upasarga strictly speaking denotes adverbs, and cannot be applied to nouns like अप्; here however, this word is used in a loose sense in the sûtra. It means प्र &c.

ऊदनोर्देशे ॥ ९८ ॥ पदानि ॥ उत्, अनोः, देशे, ॥

वृत्तिः ॥ अनोरुत्तरस्यापः ऊकारादेशो भवति देशाभिधाने ॥

98. After अनु, ऊ is substituted for (the अ of) अप्, when the sense is that of a locality.

Thus अनूपो देशः, but अन्वीपम् when locality is not meant. The long ऊ is taught for the sake of showing how the word is to be analysed; as अनु ऊपः = अनूपः ॥ The form अनूपः could have been evolved with a short उ also, as अनु + उपः = अनूपः ॥ But this analysis is not intended.

अषष्ठ्यतृतीयास्थस्यान्यस्य दुगाशीराशास्थास्थितोत्सुकोतिकारकरागच्छेषु ॥९९॥ पदानि ॥ अषष्ठी, अतृतीयास्थस्य, अन्यस्य, दुक्, आशीः, आशा, आस्था, आस्थित, उत्सुक, ऊति, कारक, राग, च्छेषु, ॥

वृत्तिः ॥ अषष्ठीस्थस्य अतृतीयास्थस्य चान्यशब्दस्य दुगागमो भवति आशिस् आशा आस्था आस्थित उत्सुक ऊति कारक राग छ इत्येतेषु परतः ॥

Kârikâ—दुगागमो ऽविशेषेण वक्तव्यः कारकच्छयोः ।
षष्ठीतृतीययोर्नेष्ट आशीरादिषु सप्तसु ॥

99. अन्य, when not used in the Genitive or the Instrumental, gets the augment दुक् (द्), before आशिस्, आशा, आस्था, आस्थित, उत्सुक, ऊति, कारक and राग, as well as before the affix छ (ईय).

Thus अन्या आशीः = अन्यदाशीः अन्या आशा = अन्यदाशा, अन्या आस्था = अन्यदास्था, अन्य आस्थितः = अन्यदास्थितः, अन्य उत्सुकः = अन्यदुत्सुकः, अन्या ऊतिः = अन्यदूतिः, अन्यः कारकः अन्यत्कारकः, अन्यो रागः = अन्यद्रागः ॥ So also with छ, as अन्यस्मिन् भवः = अन्यदीयः ॥ It takes छ because it belongs to गहादि class (IV. 2. 138.)

The word अन्य belongs to गहादि class (IV. 2. 138). Why do we say when not in Genitive or the Instrumental ?. Observe अन्यस्य आशीः = अन्याशीः, अन्येन आस्थितः = अन्यास्थितः &c. With regard to the word कारक and the affix छ, the दुक् augment is universal, though अन्य may be even in the Genitive case &c : as अन्यस्य कारकः = अन्यत् कारकम्, अन्यस्येदम् = अन्यदीयम् ॥ The unusual occurrence of two negatives in the sûtra (अषष्ठी and अतृतीया), implies this.

अर्थे विभाषा ॥ १०० ॥ पदानि ॥ अर्थे, विभाषा, (उत्तरपदे) ॥
वृत्तिः ॥ अर्थशब्दउत्तरपदे अन्यस्य विभाषा दुगागमो भवति ॥

100. दुक् is optionally the augment of अन्य when अर्थ follows.

As अन्यदर्थः or अन्यार्थः ॥

कोः कत्तत्पुरुषे ऽचि ॥ १०१ ॥ पदानि ॥ कोः, कत्त तत्पुरुषे, अचि, ॥
वृत्तिः ॥ कु इत्येतस्य कदित्ययमादेशो भवति तत्पुरुषे समासे ऽजादावुत्तरपदे ॥
वार्त्तिकम् ॥ कद्भावे त्रावुपसंख्यानम् ॥

101. कत् is substituted for कु in a Tatpurusha, when a word beginning with a vowel follows as the second member.

As कदजः, कदश्वः, कदुष्ट्रः, कदन्नम् ॥ Why do we say in a Tatpurusha? Observe कूष्ट्रो राजा ॥ Why do we say "when the second member begins with a vowel"? Observe कुब्राह्मणः, कुपुरुषः ॥

Vârt :—कत् is substituted before त्रय, as कत्रयः=कुत्सितास्त्रयः ॥

रथवदयोश्च ॥ १०२ ॥ पदानि ॥ रथ, वदयोः, च, ॥
वृत्तिः ॥ रथ वद इत्येतयोश्चोत्तरपदयोः कोः कदित्ययमादेशो भवति ॥

102. कद् is substituted for कु before रथ and वद also.

Thus कद्रथः, कद्वदः ॥

तृणे च जातौ ॥ १०३ ॥ पदानि ॥ तृणे, च, जातौ, ॥
वृत्तिः ॥ तृणशब्दउत्तरपदे जातावभिधेयायां कोः कदादेशो भवति ॥

103. कत् is substituted for कु, when तृण follows denoting a species.

As कत्तृणा नाम जातिः ॥ But कुत्सितानि तणानि=कुतृणानि ॥

का पथ्यक्षयोः ॥ १०४ ॥ पदानि ॥ का, पथि, अक्षयोः, ॥
वृत्तिः ॥ पथिन् अक्ष इत्येतयोरुत्तरपदयोः कोः का इत्ययमादेशो भवति ॥

104. का is the substitute of कु, before पथिन् and अक्ष ॥

Thus कापथः and काक्षः ॥

ईषदर्थे ॥ १०५ ॥ पदानि ॥ ईषत्-अर्थे ॥
वृत्तिः ॥ ईषदर्थे वर्त्तमानस्य कोः का इत्ययमादेशो भवति ॥

105. का is the substitution for कु, when the meaning is 'a small'.

As कामधुरम्, कालवणम्, काम्लम् ॥ Though the second member may begin with a vowel, yet this substitution takes place, in spite of VI. 3. 101 : as कोष्णम् ॥

विभाषा पुरुषे ॥ १०६ ॥ पदानि ॥ विभाषा, पुरुषे, ॥
वृत्तिः ॥ पुरुषशब्दउत्तरपदे विभाषा कोः का इत्ययमादेशो भवति ॥

106. का is optionally substituted for कु, when the word पुरुष follows.

Thus कापुरुषः or कुपुरुषः ॥ This is an aprâpta-vibhâshâ. In the sense of 'a little ईषद्', the substitution is compulsory; as ईषत् पुरुषः = का पुरुषः ॥

कवञ्चोष्णे ॥ १०७ ॥ पदानि ॥ कवम्, च, उष्णे, ॥

वृत्तिः ॥ उष्णशब्दउत्तरपदे कोः कवङित्ययमादेशो भवति का च विभाषा ॥

107. का and कवङ् are optionally the substitutes of कु when उष्ण follows.

As कवोष्णम्, कोष्णम् or कदुष्णम् ॥

पथि चच्छन्दसि ॥ १०८ ॥ पदानि ॥ पथि, च, छन्दसि, ॥

वृत्तिः ॥ पथिशब्दउत्तरपदे छन्दसि विषये कोः कव का इत्येतावादेशौ भवतो विभाषा ॥

108. This substitution of का, and कव for कु takes place in the Veda, before पथ ॥

Thus कवपथः, कापथः and कुपथः ॥

पृषोदरादीनि यथोपदिष्टम् ॥ १०९ ॥ पदानि ॥ पृषोदरादीनि, यथोपदिष्टम्, ॥

वृत्तिः ॥ पृषोदरादीनि शब्दरूपाणि येषु लोपागमवर्णविकाराः शास्त्रेण न विहिता दृश्यन्ते च तानि यथोपदिष्टानि साधूनि भवन्ति ॥

वार्त्तिकम् ॥दिक्शब्देभ्य उत्तरस्य तीरस्य तार भावो वा भवति ॥

वा० ॥ वाचो वादे डत्वं च लभावश्चोत्तरपदस्येञि प्रत्यये ॥

वा० ॥ षषउत्वं दतृदशधासूत्तरपदादेष्टुत्वं च ॥

वा० ॥ दुरोदाशनाशदभध्येषूत्वं वक्तव्यमुत्तरपदादेश्चष्टुत्वम् ॥

वा० ॥ स्वरो रोहतौ छन्दस्युत्वं वक्तव्यम् ॥ वा० ॥ पीवोपवसनादीनां च लोपो वक्तव्यः ॥

Kârikâ—वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ ।
धातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरुक्तम् ॥

109. The elision, augment and mutation of letters to be seen in पृषादर &c, though not found taught in treatises of Grammar, are valid, to that extent and in the mode, as taught by the usage of the sages.

The word यथोपदिष्टम् = शिष्टैरुच्चारितानि ॥ Thus पृषदुदरो यस्य = पृषोदरम्, पृषद् उद्वानं यस्य = पृषोद्वानम् ॥ Here there is elision of द् ॥ So also वारिवाहकः = बलाहकः, here वारि is replaced by ब, and ल replaces व of वाहक; जीवनस्य मूतः = जीमूतः, here वन has been elided; शवानां शयनं = श्मशानम्; here श्म replaces शव; and शान for शयन ॥ उर्द्ध्वं खमस्य = उलूखलम्; here उलू replaces ऊर्ध्व, and खल replaces खम ॥ पिशिताशः = पिशाचः ॥ ब्रुवन्तोऽस्यां सीदन्ति = बृसी ॥ Here सद् takes the affix ड्ट् in the locative, and ब्रुव is replaced by बृ ॥ मह्यां रौति = मयूरः ॥ Here मही is replaced by मयू, and the final of रु is elided before the affix अच् ॥ And so on with अश्वत्थ, कपित्थ &c.

Vârt:—तीर becomes optionally तार after a word denoting direction, as दक्षिणतीरम् or दक्षिणतारम्, उत्तरतीरम्, or उत्तरतारम् ॥

Vârt:—Before the Patronymic इञ् affix, वाग्वाद becomes वाड्वाल as, वाग्वादस्यापत्यं = वाड्वालिः ॥

Vârt:—The final of षष् is changed to उ before दतृ, दश, and धा (meaning

'location'): and the first letter of the second member is changed to ड or ढ ॥ Thus षड् दन्ता अस्य = षोडन्; so षोडश ; षड्धा or षोढा कुरु ॥ The addition of उ is optional here. The putting of धासु in the plural number indicates that धा has here the meaning of "in many parts or ways" (नानाधिकरण). In fact it has the force of an affix here. The rule therefore does not apply to these:—षट् दधाति or धयति = षड्धा ॥

Vârt.—The final of दुर् is changed to उ, before दाश, नाश, दभ and ध्यै and the first letters of these are changed to their corresponding cerebrals. Thus दुःखेन दाश्यते, नाश्यते, दभ्यते यः = दूडाशः, दूणाशः, दूडभः, In the last (दम्भ) there is elision of the nasal also. दुष्ट ध्यायति = दूढ्यः ॥ Here is added the affix क to the root ध्या (ध्यै) preceded by the upapada दुः, by III. I. 136.

Vârt:—उ is substituted for the final of स्वर् when the verb रुह follows in the Vedas: as एहित्वं जायेस्वो रोहाव (रोहाव is Imperative Ist. Pers. Dual).

Vârt:—The final of पीवस्, पयस् &c. is elided in the Vedas. as पीवोप वसनानां, पयोपवसनानाम् ॥

संख्याविसायपूर्वस्याह्नस्याहन्न्यतरस्यां ङौ ॥ ११० ॥ पदानि ॥ संख्या, वि, साय, पूर्वस्य, अह्नस्य, अहन्, अन्यतरस्याम्, ङौ ॥

वृत्तिः ॥ संख्या वि साय इत्येवंपूर्वस्याह्नशब्दस्य स्थाने अहनित्ययमादेशो भवत्यन्यतरस्यां ङौ परतः ॥

110. **अहन्** may optionally be substituted for **अह्न**, in the Locative singular, when a Numeral, or **वि** or **साय** precedes it.

Thus द्वयोरह्नोर्भवः = द्व्यह्नः, त्र्यह्नः ॥ The Locative singular of these are द्व्यह्नि or द्व्यहनि, त्र्यह्नि or त्र्यहनि ॥ So also द्व्यह्ने, त्र्यह्ने ॥ With वि—व्यह्नि, व्यहनि or व्यह्ने ; साय—सायाह्नि, सायाहनि, सायाह्ने ॥ These are एकशेषसमासः, and this very sûtra is an indicator that अहन् may be compounded with other words than a Numeral, or वि or साय ॥ Thus we have मध्याह्ने = मध्यमह्नः (II. 2. 1). But पूर्वाह्णे and अपराह्णे only.

ढ्रलोपे पूर्वस्य दीर्घो ऽणः ॥ १११ ॥ पदानि ॥ ढ्रलोपे, पूर्वस्य, दीर्घः, अणः ॥

वृत्तिः ॥ ढकाररेफयोर्लोपो यस्मिन् स ढ्रलोपः, तत्र पूर्वस्याणो दीर्घो भवति ॥

111. When **ढ्** or **र्** is elided, for the preceding **अ, इ** and **उ** a corresponding Long vowel is substituted.

Thus लीढम्, मीढम्, उपगूढम् ॥ रलोपे-निर्-रक्तम् = नीरक्तम्, अग्निर् रथः = अग्नीरथः, इन्दू रथः, पुना रक्तम् वासः, माता राजक्रयः ॥ For the elision of ढ see VIII. 3. 13, and for the elision of र् see VIII. 3. 14. But आवृढम्, the ऋ is not lengthened because it is not included in the pratyahâra अण् which is formed with the ण् of अ इ उ ण्॥

सहिवहोरोदवर्णस्य ॥ ११२ ॥ पदानि ॥ सहि, वहोः, ओत्, अवर्णस्य, ॥

वृत्तिः ॥ सहि वहि इत्येतयोरवर्णस्योकार आदेशो भवति ढ्रलोपे ॥

112. When **ढ्** or **र्** are elided, there is the substitution of **ओ** for the **अ** or **आ** of the verbs **सह्** and **वह्** ॥

Thus सोढा, सोढुम्, सोढव्यम्, वोढा, वोढुम् and वोढव्यम् ॥ Why do we say of अ or आ? Observe ऊढः, ऊढवान् ॥ Why do we say अवर्ण which includes long आ also? The rule will apply even when the short अ of सह and वह is changed to आ by Vṛiddhi : as उदवोढाम्, उदवोढम् ॥ Had merely अ been read into the sûtra, instead of अवर्ण then coming after the त् of ओत्, it would have denoted only short अ (तादपि परः = तपरः I. 1. 75).

साढ्यै साढ्वा साढेति निगमे ॥ ११३ ॥ पदानि ॥ साढ्यै, साढ्वा, साढा, इति, निगमे ॥

वृत्तिः ॥ साढ्यै साढ्वा साढा इति निगमे निपात्यन्ते ॥

113. **साढ्यै, साढ्वा** and **साढा** are irregularly formed in the Vedas.

Thus साढ्यै समन्तात्, साढ्वा शत्रून् ॥ The latter is formed by क्त्वा affix, the ओ substitution not taking place. In the other alternative क्त्वा is changed to यै ॥ साढा is formed by तृच् affix. In the secular literature सोढा and सोढ्वा are the proper forms.

संहितायाम् ॥ ११४ ॥ पदानि ॥ संहितायाम्, ॥

वृत्तिः ॥ संहितायामित्ययमधिकारः । यदित ऊर्ध्वमनुक्रमिष्यामः संहितायामित्येवं तद्वेदितव्यम् ॥

114. In the following sûtras upto the end of the pâda, are to be supplied the following words :—"In an uninterrupted flow of speech".

Thus sûtra VI. 3. 135 declares "अ at the end of a two-syllabic inflected verb becomes long in the Hymns". Thus विद्माहित्वा सत्पतिं शूर गोनाम् The word संहितायाम् should be read into that sûtra to complete the sense. So that when the above words stand separately, we have विद्म, हि, त्वा, सत्पतिं, शूर, गोनाम् ॥

कर्णे लक्षणस्याविष्टाष्टपञ्चमणिभिन्नच्छिन्नच्छिद्रस्रुवस्वस्तिकस्य ॥ ११५ ॥ पदानि ॥ कर्णे, लक्षणस्य, अ विष्ट, अष्ट, पञ्च, मणि, भिन्न, छिन्न, छिद्र, स्रुव, स्वस्तिकस्य (दीर्घः) ॥

वृत्तिः ॥ कर्णशब्दे उत्तरपदे लक्षणवाचिनो दीर्घो भवति विष्ट अष्टम् पञ्चम् मणि भिन्न छिन्न छिद्र स्रुव स्वस्तिक इत्येतान्वर्जयित्वा ॥

115. Before **कर्ण**, there is the substitution of a long vowel for the final of the preceding word, when it denotes a proprietorship mark on the ears of cattle, but not when the words are **विष्ट, अष्टन्, पञ्चन्, मणि, भिन्न, छिन्न, छिद्र, स्रुव** and **स्वस्तिक** ॥

Thus दात्राकर्णः, द्विगुणाकर्णः, त्रिगुणाकर्णः, द्व्यङ्गुलाकर्णः, त्र्यङ्गुलाकर्णः ॥ The word लक्षण here means any peculiar mark showing the proprietorship, put or made on the ears of animals. Why do we say when it denotes such a mark?

Observe शोभनकर्णः ॥ Why do we say 'with the exception of विष्ट &c'? Observe विष्टकर्णः ॥ अष्टकर्णः, पञ्चकर्णः, भिन्नकर्णः, छिन्नकर्णः, छिद्रकर्णः, स्रुवकर्णः, स्वस्तिककर्णः and मणिकर्णः॥

नहिवृतिवृषिव्यधिरुचिसहितनिषु क्वौ ॥११६॥ पदानि ॥ नहि, वृति, वृषि, व्यधि, रुचि, सहि, तनिषु, क्वौ, ॥

वृत्तिः ॥ नहि वृति वृषि व्यधि रुचि सहि तनि इत्येतेषु क्विप्प्रत्ययान्तेषूत्तरपदेषु पूर्वपदस्य दीर्घो भवति संहितायां विषये ॥

116. A long vowel is substituted for the final vowel of the preceding word, before the verbs नह्, वृत्, वृष्, व्यध्, रुच्, सह् and तन्, when these roots take the affix क्वि ॥

Thus उपानह् (उपानत् Nom. S.), so also, परीणत्, नीवृत्, उपावृत्, (with vṛt) प्रावृट्, उपावृट्, (with vṛsh) मर्माविंत्, हृदयाविंत्, श्वावित्, (with vyadh) नीरुक्, अभीरुक्, (with ruch) ऋतीषट्, (with sah) तरीतट् (with tan). The nasal is elided after गम् before क्वि (VI. 4. 40), by an extension of that rule, it is elided after तन् also. Why do we say when क्वि follows? Observe परिणहनम् ॥

वनगिर्योः संज्ञायां कोटरकिंशुलकादीनाम् ॥ ११७ ॥ पदानि ॥ वन, गिर्योः, संज्ञायाम्, कोटर, किंशुलकादीनाम्, ॥

वृत्तिः ॥ वन गिरि इत्येतयोरुत्तरपदयोर्यथासंख्यं कोटरादीनां किंशुलकादीनां च दीर्घो भवति संज्ञायां विषये॥

117. For the final vowel of कोटर &c. a long vowel is substituted before वन, and so also of किंशुलक &c. before गिरि, when the compound is a Name.

Thus कोटरावणम्, मिश्रकावणम्, सिध्रकावणम्, सारिकावणम् ॥

So also किंशुलकागिरिः, अञ्जनागिरिः, &c.

The न is changed to ण in वन by VIII. 4. 4. But असिपत्रवनम् and कृष्णगिरि as these words do not belong to the above classes.

1 कोटर, 2 मिश्रक, 3 सिध्रक, 4 पुरग (पुरक), 5 शारिक (सारिक) ॥

1 किंशुलुक (किंशुलक), 2 शाल्व (साल्वक), 3 नड* 4 अञ्जन, 5 भञ्जन, 6 लोहित, 7 कुक्कुट ॥

वले ॥ ११८ ॥ पदानि ॥ वले, (पूर्वस्य दीर्घः) ॥

वृत्तिः ॥ वले परतः पूर्वस्य दीर्घो भवति ॥

वार्त्तिकम् ॥ अनुत्साहभ्रातृपितॄणामिति ॥

118. The final of the preceding word is lengthened before the affix वल ॥

Thus आसुतीवलः, कृषीवलः, दन्तावलः ॥ These are formed by the affix वलच् (V. 2. 112).

Vârt:—Not so, of उत्साह, भ्रातृ and पितृ : as उत्साहवलः, भ्रातृवलः and पितृवलः ॥

मतौ बह्वचो ऽनजिरादीनाम् ॥ ११९ ॥ पदानि ॥ मतौ, बह्व चः, अनजिरादीनाम्, (संज्ञायाम्) ॥

वृत्तिः ॥ मतौ परतो बह्वचो ऽजिरादिवर्जितस्य दीर्घो भवति संज्ञायां विषये ॥

119. The final vowel of a word consisting of more than two syllables is lengthened before the affix मत्, when it is a name, but not of the words अजिर &c.

Thus उदुम्बरावती, मशकावती, वीरणावती, पुष्करावती, अमरावती ॥ These are formed by the affix मतुप् (IV. 2. 85) The मत् is changed to वत्, by VIII. 2. 11. Why do we say 'of a word consisting of more than two syllables? Observe व्रीहिमती ॥ Why 'with the exception of अजिर &c'. Observe अजिरवती, खदिरवती, पुलिनवती, हंसकारण्डवती, चक्रवाकवती ॥ When the word is not a name, there is no lengthening, as वलयवती ॥

1 अजिर, 2 खदिर, 3 पुलिन. 4 हंस, 5 कारण्डव (हंसकारण्डव) 6 चक्रवाक.

शरादीनां च ॥ १२० ॥ पदानि ॥ शरादीनाम्, च, (दीर्घः) ॥

वृत्तिः ॥ शरादीनां च मतो दीर्घो भवति संज्ञायां विषये ॥

120. The final vowel of शर &c. is lengthened before मत् when it is a Name.

As शरावती, वंशावती ॥ The म of मत् is changed to व because it is a Name (VIII. 2. 11). But not so after व्रीहि &c as these belong to यवादि class (VIII. 2. 9).

1 शर, 2 वंश, 3 धूम, 4 अहि, 5 कपि 6 मणि, 7 मुनि, 8 शुचि, 9 हनु.

इको वहे ऽपीलोः ॥ १२१ ॥ पदानि ॥ इकः, वहे, अपीलोः ॥

वृत्तिः ॥ इगन्तस्य पूर्वपदस्य पीलुवर्जितस्य वहउत्तरपदे दीर्घो भवति ॥

वार्त्तिकम् ॥ अपील्वादीनामिति वक्तव्यम् ॥

121. The final इ and the उ of a word, with the exception of पीलु, are lengthened before वह ॥

Thus ऋषीवहम्, कपीवहम्, मुनीवहम् ॥ Why do we say 'ending in इक् vowels'? Observe पिण्डवहम् ॥ Why not of पीलु? Observe पीलुवहम् ॥

Vârt:—It should be stated "with the exception of पीलु and the rest." As दारुवहम् ॥

उपसर्गस्य घञ्यमनुष्ये बहुलम् ॥ १२२ ॥ पदानि ॥ उपसर्गस्य, घञि, अमनुष्ये, बहुलम्, ॥

वृत्तिः ॥ उपसर्गस्य घञन्तउत्तरपदे ऽमनुष्येभिधेये बहुलं दीर्घो भवति ॥

122. The final vowel of a Preposition is diversely lengthened, before a word formed by the kṛit-affix घञ्, but not when the compound denotes a human being.

Thus नीक्लेदः, वीमार्गः, अपामार्गः ॥ It does not take place, as प्रसेवः, प्रसारः ॥ It is lengthened before साद and कार, when building is meant, as प्रासादः and प्राकारः, otherwise प्रसादः and प्रकारः ॥ Optionally in वेश &c. as प्रतिवेशः or प्रतीवेशः, प्रतिरोधः or प्रतीरोधः ॥ When human beings are meant, there is no lengthening, as निषादो मनुष्यः ॥

27

इकः काशे ॥ १२३ ॥ पदानि ॥ इकः, काशे, (दीर्घः) ॥
वृत्तिः ॥ इगन्तस्योपसर्गस्य काशशब्दउत्तरपदे दीर्घो भवति ॥

123. A Preposition ending in इ, or उ lengthens its final before काश ॥

As नीकाशः, वीकाशः, अनूकाशः ॥ काश is formed by अच् (III. 1. 134). Why do we say 'ending in इ or उ'? Observe प्रकाशः where the Preposition does not end in इक् ॥

द्स्ति ॥ १२४ ॥ पदानि ॥ दः, ति, (दीर्घः इकः उपसर्गस्य) ॥
वृत्तिः ॥ दा इत्येतस्य यस्तकारादिरादेशस्तस्मिन्परत इगन्तस्योपसर्गस्य दीर्घो भवति ॥

124. A Preposition ending in इ or उ lengthens its final vowel, before the verb दा, when the latter is changed to त ॥

Thus नीत्तम्, वीत्तम्, परीत्तम् ॥ See VII. 4. 47 for the change of दा to त ॥ But प्रत्तम्, अवत्तम्, where the prepositions do not end in इ or उ ॥ Why do we say 'दा is changed to त'? Observe वितीर्णम् नितीर्णम् ॥ Why do we say ति 'a substitute of दा, beginning with a त'? Observe सुदत्तम्, here दद् is the substitute of दा (VII. 4. 46).

अष्टनः संज्ञायाम् ॥ १२५ ॥ पदानि ॥ अष्टनः, संज्ञायाम्, (दीर्घः) ॥
वृत्तिः ॥ अष्टनित्येतस्योत्तरपदे संज्ञायां दीर्घो भवति ॥

125. A long vowel is substituted for the final of अष्टन् before the second member, when the compound is a name.

Thus अष्टावक्रः, अष्टाबन्धुरः अष्टापदम् ॥ But अष्टपुत्रः, अष्टभार्यः where the compounds are not names.

छन्दसि च ॥ १२६ ॥ पदानि ॥ छन्दसि, च, (दीर्घः) ॥
वृत्तिः ॥ छन्दसि विषये ऽष्टन उत्तरपदे दीर्घो भवति ॥
वार्त्तिकम् ॥ गवि च युक्ते भाषायामष्टनो दीर्घो भवतीति वक्तव्यम् ॥

126. In the Veda also, the long vowel is substituted for the final of अष्टन् before a second member.

Thus आग्नेयमष्टाकपालं निर्वपेत्, अष्टाहिरण्या दक्षिणा, अष्टापदी देवता सुमती ॥ The form अष्टापदी is the feminine in ङीप् (IV. 1. 8) of अष्टपात् (V. 4. 138 the अ of पाद being elided in a Bahuvrîhi), पद् being substituted for पात् by VI. 4, 130.

Vârt:—The final of अष्टन् is lengthened before गो even in the vernacular, when yoking is meant. Thus अष्टागवं शकटम् ॥

चितेः कपि ॥ १२७ ॥ पदानि ॥ चितेः, कपि, (दीर्घः) ॥
वृत्तिः ॥ चितिशब्दस्य कपि परतो दीर्घो भवति ॥

127. The final vowel of चिति is lengthened before the affix कप् ॥

Thus एकान्चितीकः, द्विचितीकः, त्रिचितीकः ॥

विश्वस्य वसुराटोः ॥ १२८ ॥ पदानि ॥ विश्वस्य, वसु, राटोः, (दीर्घः) ॥

वृत्तिः ॥ विश्वशब्दस्य वसु राडित्येतयोरुत्तरपदयोर्दीर्घ आदेशो भवति ॥

128. The final vowel of **विश्व** is lengthened before **वसु** and **राट्** (the form assumed by **राज्**).

Thus विश्वावसुः, विश्वाराट् ॥ The rule applies to the राट् form of राज in the Nominative singular, and not when it retains its own form: as विश्वराजौ, विश्वराजः ॥

नरे संज्ञायाम् ॥ १२९ ॥ पदानि ॥ नरे, संज्ञायाम्, (दीर्घः) ॥

वृत्तिः ॥ नरशब्दउत्तरपदे संज्ञायां विषये विश्वस्य दीर्घो भवति ॥

129. The final of **विश्व** is lengthened before **नर**, when the compound is a Name.

Thus विश्वानरः, वैश्वानरिः (the son of Vishvânara). But विश्वनरः = विश्वे नरा यस्य when it is not a name.

मित्रे चर्षौ ॥ १३० ॥ पदानि ॥ मित्रे, च, ऋषौ, (दीर्घः) ॥

वृत्तिः ॥ मित्रे चोत्तरपदे ऋषावभिधेये विश्वस्य दीर्घो भवति ॥

130. The final of **विश्व** is lengthened before **मित्र** when it is the name of a Rishi.

As विश्वामित्रः 'the sage Viśvâmitra'. But विश्वमित्रः 'a boy called Viśvamitra'.

मन्त्रे सोमाश्वेन्द्रियविश्वदेव्यस्य मतौ ॥ १३१ ॥ पदानि ॥ मन्त्रे, सोम, अश्व, इन्द्रिय, विश्वदेव्यस्य, मतौ, (दीर्घः) ॥

वृत्तिः ॥ मन्त्रविषये सोम अश्व इन्द्रिय विश्वदेव्य इत्येतेषां मतुप्प्रत्यये परतो दीर्घो भवति ॥

131. In a Mantra, the final vowels of **सोम**, **अश्व**, **इन्द्रिय** and **विश्वदेव्य** are lengthened when the affix **मतुप्** follows.

Thus सोमावती, अश्वावती, इन्द्रियावती, विश्वदेव्यावती ॥

ओषधेश्च विभक्तावप्रथमायाम् ॥ १३२ ॥ पदानि ॥ ओषधेः, च, विभक्तौ, अप्रथमायाम्, (मन्त्रे) ॥

वृत्तिः ॥ ओषधिशब्दस्य विभक्तावप्रथमायां परतो दीर्घो भवति ॥

132. In a Mantra, the final of **ओषधि** is lengthened before the case-endings, but not in the Nominative.

Thus ओषधीभिरपीपतत्, नमः पृथिव्यै नमः ओषधीभ्यः ॥ Why do we say 'before case-endings'? Observe ओषधिपते ॥ Why do we say 'but not in the Nominative'? Observe स्थिरेयमस्त्वोषधिः ॥

ऋचि तुनुघमक्षुतङ्कुत्रोरुष्याणाम् ॥ १३३ ॥ पदानि ॥ ऋचि, तु, नु, घ, मक्षु, तङ्, कुत्र, उरुष्याणाम्, (दीर्घः) ॥

वृत्तिः ॥ ऋचि विषये तु नु घ मक्षु तङ् कु त्र उरुष्य इत्येषां दीर्घो भवति ॥

133. In the Rig-Veda the finals of the particles नु, तु, घ, मक्षु, the tense-affix तङ्, कु, the ending त्र and the word उरुष्य are lengthened.

Thus तु :—आ तू न इन्द्र वृत्रहन् (Rig IV. 32. 1) नु—नू करणे ॥ घ : —उत वाघा स्यालात् ॥ मक्षु:—मक्षू गोमन्तमीमहे ॥ तङ् :— भरत जातवेदसम् (Rig X. 176. 2). तङ् is the त substitute of थ, when it is treated as ङित्, therefore it does not apply here, शृणोत ग्रावाणः (I. 2. 4). कु—कूमनस् ; त्र—अत्रा गौः ; उरुष्या णोग्रे: ॥

इकः सुञि ॥ १३४ ॥ पदानि ॥ इकः, सुञि, (दीर्घः) ॥

वृत्तिः ॥ सुञ् निपातो गृह्यते । इगन्तस्य सुञि परतो मन्त्रविषये दीर्घो भवति ॥

134. In a Mantra, the finals of the preceding member ending in इ or उ are lengthened before the particle सु ॥

Thus अभी षु णः सखीनाम् (Rig. IV. 31. 3) ऊर्ध्व ऊ षुण ऊतये (Rig I. 36. 13). The स is changed to ष by VIII. 3. 107: and न changed to ण by VIII. 4. 27.

द्व्यचोतस्तिङः ॥ १३५ ॥ पदानि ॥ द्व्यचः, अतः, तिङः, (ऋचि दीर्घः) ॥

वृत्तिः ॥ द्व्यचस्तिङन्तस्यात ऋग्विषये दीर्घो भवति ॥

135. A tense affix ending in अ is lengthened in the Rig-veda, when the Verb consists of two syllables.

Thus विद्मा हि त्वा सत्पतिं शूर गोनाम् &c. See Rig III. 42. 6, विद्मा हि तस्य पितरम् &c. But not here देवा भवत वाजिनः, as the verb consists of more than two syllables: not also here आ देवान् वक्षि यक्षि च as the verbs do not end in अ ॥

निपातस्य च ॥ १३६ ॥ पदानि ॥ निपातस्य, च, (ऋचि) (दीर्घः) ॥

वृत्तिः ॥ निपातस्य च ऋग्विषये दीर्घ आदेशो भवति ॥

136. In the Rig Veda the final of a particle is lengthened.

Thus एवा ते, अच्छाते, अच्छा जरितारः (R. 1. 2. 2).

अन्येषामपि दृश्यते ॥ १३७ ॥ पदानि ॥ अन्येषाम्, अपि, दृश्यते, (दीर्घः) ॥

वृत्तिः ॥ अन्येषामपि दीर्घो दृश्यते स शिष्टप्रयोगादनुगन्तव्यः ॥ यस्य दीर्घत्वं न विहितं दृश्यते च प्रयोगे तद्नेन कर्त्तव्यम् ॥

वार्त्तिकम ॥ शुनो दन्तदंष्ट्राकर्णकुन्दवराहपुच्छपदेषु ॥

137. The elongation of the final is to be found in other words also.

Here we must follow the usage of the Sishthas. Where the lengthening is not ordained by any of the rules of Grammar, but occurs in the writing of standard authors, there we should accept such lengthening as valid. Thus केशाकेशि, कचाकचि, जलासाद्, नारकः, पूरुषः ॥

Vârt:—The final of श्वन् is lengthened before the following दन्त, दंष्ट्रा, कर्ण कुन्द, वराह, पुच्छ, and पद:—as श्वादन्तः श्वादंष्ट्रः, श्वाकर्णः, श्वाकुन्दः, श्वावराहः, श्वापुच्छः, श्वापदः ॥

चौ ॥ १३८ ॥ पदानि ॥ चौ, (पूर्वस्यदीर्घः) ॥

वृत्तिः ॥ चौ परतः पूर्वपदस्य दीर्घो भवति ॥ चावित्यञ्चतिर्लुप्तनकाराकारो गृह्यते ॥

138. The final vowel of the preceding member is lengthened before अञ्च, when it assumes the form च, having lost its nasal and the vowel.

Thus दधीचः पश्य, दधीचा, दधीचे, मधूचः पश्य, मधूचा, मधूचे ॥ The nasal of अञ्च is elided by VI. 4. 24, and the अ by VI. 4. 138. In दधि+अच् the इ is not changed to its semivowel, though that is an antaranga rule, because the present sûtra ordains specifically long ई, and so also दधी+अच् and मधू+अच् ॥ See also VI. 3. 92.

संप्रसारणस्य ॥ १३९ ॥ पदानि ॥ संप्रसारणस्य, (उत्तरपदे दीर्घः) ॥

वृत्तिः ॥ संप्रसारणान्तस्य पूर्वपदस्योत्तरपदे दीर्घो भवति ॥

139. The vowel substituted for a semivowel is lengthened, when it stands as the first member of a compound.

As कारीषगन्धीपुत्रः, कारीषगन्धीपतिः, कौमुदगन्धीपतिः ॥ See VI. 1. 13. करीषस्येव गन्धोऽस्य=करीषगन्धिः (इ being added as samâsânta by V. 4. 136 and 137). The optional shortening ordained by VI. 3. 61. does not apply here, for that option is a definite and restricted option; moreover, on the maxim of परत्व, 'a subsequent rule superseding a precedent,' rule VI. 3. 61 is superseded by VI. 3. 139; and the rule VI. 3. 61 can not be revived by the maxim पुनः प्रसङ्ग विज्ञानं "occasional ly the formation of a particular form is accounted for by the fact that a preceding rule is allowed to apply again, after it had previously been superseded, by a subsequent rule." For here the following maxim will prevent the revival सकृद्गतौ विप्रतिषेधेयद्बाधितं तद्बाधितमेव "when two rules, while they apply simultaneously, mutually prohibit each other, that rule of the two which is once superseded by the other, is superseded altogether, and cannot, therefore, apply again, after the latter rule has taken effect."

ओम्३ ।

षष्ठाध्यायस्य चतुर्थः पादः ।

BOOK SIXTH.

CHAPTER FOURTH

अङ्गस्य ॥ १ ॥ पदानि ॥ अङ्गस्य, ॥

वृत्तिः ॥ अधिकारोयमाऽऽसप्तमाध्यायपरिसमाप्तेः । यदित ऊर्द्ध्वमनुक्रमिष्यामोऽङ्गस्येत्येवं तद्वेदितव्यम् ॥

1. Whatever will be taught here after upto the end of the Seventh Adhyâya, is consequent upon the stem (aṅga).

This is an adhikâra sûtra. Thus in VI. 4. 2 is taught the lengthening of the vowel of a samprasâraṇa: as हूतः, जीतः, संवीतः ॥ That means that the vowel preceded by a consonant belonging to the stem is lengthened. Therefore in निर्+वेञ्+क्त=निरुतम्, the vocalised vowel उ is not lengthened, as निर् is upasarga and not stem. So दुरुतम् ॥ Similarly VI. 4. 3, teaches the lengthening of the final before नाम्, as अग्नीनाम्, वायूनाम् ॥ But क्रिमिणाम् पश्य, पामनां पश्य, as मि and म are not the end-portions of a stem. The stem is क्रिमिणा and पामना 'a female having क्रिमि or पामन्', formed by न affix (V. 2. 100). The forms क्रिमिणाम् and पामनाम् are Accusative Singular. Similarly VII. 1. 9 teaches that after अ, भिस् is changed into ऐस् ॥ As वृक्षैः, प्लक्षैः ॥ There also, the अ must be the अ final in an aṅga or stem: hence not here ब्राह्मणभिस्सा, ओदनभिस्सटा, the भिस् does not follow an aṅga. भिस्स means boiled rice and भिस्सटा means दधिः ॥

The maxim of अर्थवद्ग्रहणे नानर्थकस्य does not apply here; for had it been so, there would have been no necessity of making this sûtra. For example, in the sûtra नामि (VI. 4. 3), the affix नाम् having a meaning would have been meant, and not any other नाम् ॥

The word अङ्गस्य must be read in the following sûtras, otherwise there would arise incongruity: *first*; sûtras teaching the lengthening of the vowel when सन् or Samprasaraṇa follows, thus: VI. 4. 16 ordains the lengthening of vowel before सन्, as चिचीषति; but not here दधि सनोति for इ of दधि is not that of aṅga. So also in Samprasârana, but not in निरुत &c as shown above.

2ndly—For the purposes of एत्वे in sûtra VI. 4. 68. The optional change of आ into ए must refer to anga,, as ग्लेयात् or ग्लायात्, but not here निर्यायात् or निर्वायात्, for here र् is not part of the anga, and so र्य cannot be considered a conjunct part of anga.

3rdly—For the change of तु to तात् in VII. 1. 35. There also तु must be portion of the anga, and not the particle तु, therefore, जीवतु or जीवतात्, but hot here जीव तु त्वम् ॥

4thly—For the substitution of इयङ् aud उवङ् in VI. 4. 77. Therefore not here श्यर्थम् and वर्थम् ॥

5thly—For the sake of नुट् augment in VII. 1. 54. But not here कुमारी आमिति आह ॥

6thly—For the sake of shortening of vowels. Thus VII. 4. 13 ordains the shortening of अण् vowels before क ॥ It refers to the anga-vowel, as कुमारिका ॥ But not here, कुमारी कस्मै स्पृहयति or कुमार्याः कं सुखं=कुमारीकं ॥

And lastly for तत्व or त substitution. Thus VII. 4. 48 ordains the change of प into त् in the case of अप् before भ ॥ It refers to anga, as अद्भिः ॥ But not here अब्भारः, for अप् here is not anga.

To sum up in Sanskrit : सन् सम्प्रसारण दीर्घत्वैत्त्वतातार्ङियङुवङ्नुट् ह्रस्वत्व तत्वे च अङ्गस्येत्यधिकारे प्रयोजनं ॥

The word अङ्गस्य is in the Genitive case. But the force of Genitive is here not only that taught in I. 1. 49 (स्थाने योगः), but of mere relation-ship. Or अङ्गस्य may be considered as a mere prâtipadika, without any case-affix. In the subsequent aphorisms, it should be read with proper case-affixes as the exigencies of each sûtra may require. Thus in अतो भिस ऐस् (VII. 1. 9) अङ्ग should be read in the ablative case : अकारान्ताद् अङ्गाद् भिसः ऐस् ॥ The Genitive case has force of स्थानषष्ठी in sûtras like हन्तेर्जः, where the *whole* of हन् is replaced (VI. 4. 36). It has the force of अवयवषष्ठी in sûtras like ऊदुपधाया गोहः (VI. 4. 89). It has the force of निमित्तनिमित्ति सम्बन्धः in युवोरनाकौ (VII. 1. 1). Or the Genitive case in अङ्गस्य may be changed into any other case, as already shown.

हलः ॥ २ ॥ पदानि ॥ हलः, (अङ्गस्य सम्प्रसारणम् दीर्घः) ॥

वृत्तिः ॥ अङ्गावयवाद्धलो यदुत्तरं संप्रसारणं तदन्तस्याङ्गस्य दीर्घो भवति ॥

2. The long vowel is substituted for a vocalised half-vowel अ, इ and उ at the end of a stem, when it is preceded by a consonant which is a portion of the stem.

Both the words दीर्घ and अण् from VI. 3. 111, and संप्रसारण from VI. 3. 139 are understood here. Thus हूतः from ह्वा, जीनः from ज्या, संवीतः from व्या ॥ Why do we say 'preceded by a consonant'? Observe उतः and उतवान् from वेञ्॥ Why do we say that the preceding consonant should be a portion of the stem?

Observe निरुतम्, here र is not an integral part of the stem, but a portion of the upasarga निर् and therefore उ is not lengthened. Why do we say 'at the end of a stem'? Observe विद्धः, विचितः from व्यध् and व्यच्; here the vowel इ is in the *middle* of the stem. Why do we say 'अ, इ and उ substitutes of semivowels'? Observe तृतीयः ॥ Here त्रि has been vocalised into तृ, ऋ being substituted for र् before the affix तीय (V. 2. 55). The ऋ will not be lengthened. Or the absence of lengthening in तृतीय is an irregularity countenanced by Pâṇini himself in sûtras like II. 1. 30 &c. The word अङ्ग should be repeated in this sûtra, first to qualify the word हल, and then to qualify the letters अ, इ and उ ॥

नामि ॥ ३ ॥ पदानि ॥ नामि, (अङ्गस्य दीर्घः) ॥

वृत्तिः ॥ नामीत्येतत्षष्ठीबहुवचनम् आगतनुट्कं गृह्यते ॥ तस्मिन्परतोऽङ्गस्य दीर्घो भवति ॥

Kârikâ—नामि दीर्घ आमि चेत्स्यात्कृते दीर्घे न नुट् भवेत् ।
वचनाद्यत्र तन्नास्ति, नोपधायाश्च चर्मणाम् ॥

3. The long vowel is substituted for the final of the stem before the Genitive Plural affix नाम् (having the augment नुट्).

Thus अग्नीनाम्, वायूनाम्, कर्तॄणाम्, हर्तॄणाम् ॥ The anuvritti of अण् (VI. 3. 111) ceases. The augment नुट् (VII. 1. 54) in नाम् is for the sake of the subsequent sûtra; like VI.4.7. and the lengthening takes place after the addition of नुट् to the genitive affix आम् ॥ For if the lengthening took place before the addition of नुट्, there would be no occasion for नुट् which comes only after short stems.

न तिसृचतसृ ॥ ४ ॥ पदानि ॥ न, तिसृ, चतसृ, (नामि दीर्घः) ॥

वृत्तिः ॥ तिसृ चतसृ इत्येतयोर्नामि दीर्घो न भवति ॥

4. The finals of तिसृ and चतसृ are not lengthened before नाम् ॥

As तिसृणाम्, चतसृणाम् ॥ The very fact of this prohibition proves by implication that the final ऋ of these words is not changed to र before a genitive plural, VII. 2. 100 notwithstanding. In fact नुट् is added before scope is given to that rule, and thus the preceding rule VII. 1. 54 prevents the application of the subsequent rule VII. 2. 100.

छन्दस्युभयथा ॥ ५ ॥ पदानि ॥ छन्दसि, उभय था ॥

वृत्तिः ॥ छन्दसि विषये तिसृचतसोर्नामि परत उभयथा दृश्यते, दीर्घश्चादीर्घश्च ॥

5. In the Veda, the finals of तिसृ and चतसृ are found in both ways, before the Genitive plural नाम् ॥

In some places they are seen as lengthened, in others not. As तिसृणा मध्यंदिने or तिसॄणाम् मध्यंदिने ॥ So also चतसृणाम् and चतसॄणाम् ॥

नृ च ॥ ६ ॥ पदानि ॥ नृ, च, ॥

वृत्तिः ॥ नृ इत्येतस्य नामि परत उभयथा भवति ॥

6. So also नृ before the Genitive Plural नाम् is lengthened optionally.

As त्वं नृणां नृपते, and त्वं नृणां नृपते ॥ According to some this option is confined to the Vedas, according to others, it extends to secular literature also.

नोपधायाः ॥ ७ ॥ पदानि ॥ न, उपधायाः, (नामि दीर्घः) ॥

वृत्तिः ॥ नान्तस्याङ्गस्योपधाया नामि परतो दीर्घो भवति ॥

7. In a stem ending in न्, the preceding vowel is lengthened before the affix नाम् ॥

Thus पञ्चन् + नाम् (VII. 1. 55) = पञ्चान् + नाम् (VI. 4. 7) = पञ्चानाम् (VIII. 2. 7); सप्तानाम्, नवानाम्, दशानाम् ॥ Why do we say 'ending in न्'? Observe चतुर्णाम् ॥ But not in चर्मणाम् where the affix is not नाम् but आम् without नुट् ॥

सर्वनामस्थाने चासंबुद्धौ ॥ ८ ॥ पदानि ॥ सर्वनामस्थाने, च, असम्बुद्धौ (नोपधायाः दीर्घः) ॥

वृत्तिः ॥ सर्वनामस्थाने च परतो ऽसंबुद्धौ नोपधाया दीर्घो भवति ॥

8. In a stem ending in न्, the preceding vowel is lengthened in strong cases, with the exception of the Vocative singular.

As राजा, राजानौ, राजानः, राजानम्, राजानौ ॥ So also सामानि तिष्ठन्ति ॥ राजा was राजान्स्, the स् was elided by VI. 1. 68, and न् by VIII. 2. 7. Why do we say 'in strong cases'? Observe राजनि (Loc-Sing); सामनि (Loc. Sing). Why do we say 'but not in the Vocative Singular'? Observe हे राजन्! हे तक्षन्!

वा षपूर्वस्य निगमे ॥ ९ ॥ पदानि ॥ वा, ष, पूर्वस्य, निगमे ॥

वृत्तिः ॥ षपूर्वस्याचो नोपधाया निगमविषये सर्वनामस्थाने परतो ऽसंबुद्धौ वा दीर्घो भवति ॥

9. The lengthening of the penultimate vowel of a stem ending in न्, before the affixes of the strong-case, is optional in the Veda, when ष precedes such a vowel.

Thus स तक्षाणं or तक्षणं, तिष्ठन्तमब्रवीत् । ऋभुक्षाणं or ऋभुक्षणमिन्द्रम् ॥

Why do we say 'in the Veda'? In the secular literature we have तक्षा, तक्षाणौ तक्षाणः always.

सान्तमहतः संयोगस्य ॥ १० ॥ पदानि ॥ सान्त, महतः, संयोगस्य, (दीर्घः) ॥

वृत्तिः ॥ सकारान्तस्य संयोगस्य यो नकारः महतश्च तस्योपधाया दीर्घो भवति सर्वनामस्थाने परतो ऽसंबुद्धौ ॥

10. In the strong cases with the exception of Vocative singular, the penultimate vowel is lengthened, in the case of a stem ending in स्, with a Nasal consonant preceding it, and of महत् ॥

That is, a stem ending in the conjunct consonant न्स्, elongates its penultimate vowel before the affixes of the first five cases. Thus श्रेयान्, श्रेयांसौ, श्रेयांसः, श्रेयांसि, पयांसि, यशांसि ॥ महत्—महान्, महान्तौ, महान्तः ॥ But हे श्रेयन्, हे महन् in Vocative Singular. The Nasal is inserted by VII. 1. 70.

अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तॄणाम् ॥११॥ पदानि ॥ अप्, तृन्, तृच्, स्वसृ, नप्तृ, नेष्टृ, त्वष्टृ, क्षत्तृ, होतृ, पोतृ, प्रशास्तॄणाम् ॥

वृत्तिः ॥ अप् इत्येतस्य तृजन्तस्य स्वसृ नप्तृ नेष्टृ त्वष्टृ क्षत्तृ होतृ पोतृ प्रशास्तृ इत्येतेषां चाङ्गानामुपधाया दीर्घो भवति सर्वनामस्थाने परतो ऽसंबुद्धौ ॥

11. In the strong cases, with the exception of the Vocative Singular, the penultimate vowel is lengthened in **अप्**, in stems formed by **तृन्** and **तृच्** affixes, and in **स्वसृ, नप्तृ, नेष्टृ, त्वष्टृ, क्षत्तृ, होतृ, पोतृ** and **प्रशास्तृ** ॥

Thus आपः तिष्ठन्ति ॥ Some would have it even in compounds; as बह्वाम्पि तडागानि ॥ The Samâsânta rule is not applied here, because it is *anitya*. If it be considered *nitya*, then also there is lengthening, but without the addition of the nasal. तत्र समासान्तो विधिरनित्य इति समासान्तो न क्रियते। नित्यमपि च नुममकृत्वा दीर्घत्वमिष्यते। तन्। कर्त्तारौ कटान्। वदितारौ जनापवादान्। कर्त्तारः। तृच्। कर्त्तारौ कटस्य। कर्त्तारः। हर्त्तारौ भारस्य, हर्त्तारः। स्वसृ। स्वसा। स्वसारौ। स्वसारः। नप्तृ। नप्ता। नप्तारौ। नप्तारः। नेष्टृ। नेष्टारौ। नेष्टारः। त्वष्टृ। त्वष्टारौ। त्वष्टारः। क्षत्तृ। क्षत्तारौ। क्षत्तारः। होतृ। होतारौ। होतारः। पोतृ। पोतारौ। पोतारः। प्रशास्तृ। प्रशास्तारौ। प्रशास्तारः। नप्त्रादीनां ग्रहणमव्युत्पत्तिपक्षे विध्यर्थम्। व्युत्पत्तिपक्षे नियमार्थम्। एवंभूतानामन्येषां संज्ञाशब्दानां दीर्घो मा भूदिति। पितरौ। पितरः। मातरौ। मातरः। असंबुद्धाविति किम्। हेकर्त्तः। हेस्वसः ॥

If the words नप्तृ &c. be considered as रूढि, not derived from any root, then their enumeration is here for the sake of Vidhi (injunction); if they be considered as derivative words formed by Uṇadi affixes, then their enumeration is for the sake of niyama (restriction), so that other words formed similarly are not to be governed by this rule. As पितरौ, पितरः, मातरौ, मातरः ॥ Why do we say 'not in the Vocative Singular'? Observe हे कर्त्तः, हे स्वसः ॥ In the above examples अर् is substituted for ऋ by VII. 3. 110.

इन्हन्पूषार्यम्णां शौ ॥ १२ ॥ पदानि ॥ इन्, हन्, पूष अर्यम्णां, शौ, (दीर्घः) ॥

वृत्तिः ॥ इन् हन् पूषन् अर्यमन् इत्येवमन्तानामङ्गानां शौ परत उपधाया दीर्घो भवति ॥

12. The penultimate vowel is lengthened before the affix शि (Nominative and Accusative Pl.), when the stem ends in **इन्**, or **हन्**, or **पूषन्** or **अर्यमन्** ॥

According to the maxim (See VI. 4. 14 also) that "अन्, इन्, अस्, मन् ग्रहणान्यर्थवता चानर्थकेन च तदन्त विधिं प्रयोजयन्ति", the employment of इन् in this sûtra includes and means "words *ending* in the syllable इन्" ॥ As regards the rest (हन् &c.), the affix शि (Neuter Pl.) is never added to them alone, but when they are parts of a compound. Thus हन् is a noun formed by the addition of

the affix क्विप् to the root हन् ; and the affix Kvip is added to it only then, when it is preceded by another word like "Brahma" &c. See III. 2. 87. Similarly the words पूषन् and अर्यमन् are masculine and cannot take the Neuter Plural affix शि in their original state. They must be parts of a neuter compound, to admit this affix. Hence we have used words "when the stem *ends* in इन् &c."

Thus बहुदण्डीनि and बहुच्छत्रीणि । बहुवृत्रहाणि । बहुभ्रूणहाणि । बहुपूषाणि । बह्वर्यमाणि ॥ सिद्धे सत्यारम्भो नियमार्थः । इन्हन्पूषार्यम्णामुपधायाः शावेव दीर्घो भवति नान्यत्र । दण्डिनौ । छत्रिणौ । वृत्रहणौ । पूषणौ । अर्यमणौ ॥

Though this result could have been obtained by VI. 4. 8, the special mention of these words shows that except in Accusative and Nom. Pl. the lengthening does not take place in other strong cases. As दण्डिनौ, छत्रिणौ, वृत्रहणौ, पूषणौ, अर्यमणौ ॥

Kârikâ :—Regarding the rule of lengthening taught about इन् &c here, let the wise reader, after making a restrictive rule with regard to सुट् (sarvanâmas thâna) affixes in general, make again another rule regarding the affix शि in particular, (i. e., make a yoga-bibhâga). By so doing, the form भ्रूणहानि (Loc. sin.) of the Achârya, will not be found fault with.

2. (But if yoga-vibhaga be not made) then I rule that the anuvritti of सुट् being dropped, let the rule be made with regard to शि affix in general (without regarding it as a Sarvanâmasthâna affix). And as the rule of lengthening applies to penultimates, there would arise no fault, if the vowel of हन् is lengthened before the demonstrative affix य (in words like वृत्रहायते=वृत्रहा इव आचरात, This refers to VII, 4. 25).

3. Or if the anuvṛitti of सुट् (Sarvanamasthana) be taken into this Sûtra, because of the context, then the mention of शि in this Sûtra, (would be redundant, because the word Sarvanâmasthâna includes it, so far as the strong cases are concerned) but it would find scope and utility in preventing the lengthening in those cases to which the context of Sarvanâmasthâna does not apply. That is, the Sarvanâmasthâna will be restricted with regard to इन् &c to the affix शि and not to सुट् affixes generally.

Note :—शि is the affix of the Nom. and Acc. Pl. in Neuter (VII. 1. 20.) It it a Sarvanamasthana by I. 1. 42. But the word Sarvanamasthana may be read into this sutra from the preceding VI. 4. 8. What is then the necessity of employing शि in this ? The above karika answers this.

In the case of हन् ending words, the subsequent rule VI. 4. 15, which required the lengthening of the penultimate vowel before an affix having an indicatory क् or ङ्, is however debarred by the present restrictive rule. Thus the Locative Singular (ङि) is वृत्रहनि, and भ्रूणहनि ॥ How do you make this ? By splitting up the present sutra into two parts, the first part being इन् हन् पूषार्यम्णाम्, and the second being शौ ॥ It would then mean :—

(1) The penultimate vowel is lengthened, in strong cases only and no where else, when the stem ends in इन् or हन् or in पूषन् or अर्यमन् ॥ (2) So also it is lengthened before the strong case शि and no where else. These two restrictive rules therefore, would debar all other rules of penultimate lengthening which would otherwise have been applicable. But a rule which does not relate to *penultimate* vowel, is not debarred by this restriction, but does take effect. Thus वृत्रहायते, भ्रूणहायते denominative verbs in क्यङ् ॥

Or even though the Sarvanâmasthâna may be read into the sûtra by anuvṛitti, yet this may be considered a Restrictive Rule in general, and not only with regard to शि considered a Sarvanâmasthâna or a Neuter affix शि is the Sarvanâmasthâna affix of the Neuter: which has no other Sarvanâmasthâna, therefore, it is a general Niyama and not only a Sarvanâmasthâna or a Neuter niyama. Therefore in this niyama the word "नपुंसकस्य"—"of the Neuter"—is not to be taken.

For if it be taken, then the Sûtra would mean, the neuter stems in इन् &c are lengthened in शि only and no where else. The result would be that in examples like भ्रूणहनि ब्राह्मणकुले (loc. sin), there would be no lengthening at all (i.e. we shall never have the form भ्रूणहानि in loc. sin. by force of VI. 4. 15); moreover, by so doing, there would arise this anomaly also, that words other than Neuter would also not be lengthened.

The force of the definition of Sarvanâmasthâna applies to Neuter also in certain cases, therefore, any rule (niyama) made with regard to Sarvanâmasthâna would apply to Neuter also.

सौ च ॥ १३ ॥ पदानि ॥ सौ, च, (उपधायाः दीर्घः) ॥

वृत्तिः ॥ सावसंबुद्धौ परत इन्हन्पूषार्यम्णामुपधाया दीर्घो भवति ॥

13. The penultimate vowels of a stem ending in इन्, हन्, पूषन् or अर्यमन् are lengthened before the affix सु of the Nominative Singular but not in Vocative Singular.

Thus दण्डी, वृत्रहा, पूषा, अर्यमा ॥ The न् is elided by VIII. 2. 7, and the case-affix by VI. 1. 68. In the Vocative singular we have हे दण्डिन्, हे पूषन्, हे वृत्रहन् हे अर्यमन् ॥

अत्वसन्तस्य चाधातोः ॥ १४ ॥ पदानि ॥ अतु, असन्तस्य, च, अधातोः ॥

वृत्तिः ॥ अतु अस इत्येवमन्तस्य अधातोरुपधायाः सावसंबुद्धौ परतो दीर्घो भवति ॥

